गोदावरी, स्त्री, ( गां जलं स्वर्गं वा ददातीति गोदा। तासु वरी श्रेष्ठा। वर+ङीष् संज्ञायाम्। यद्वा गां स्वर्गं ददाति। गो+दा+वनिप्+ङीप् रान्तादेशश्च। ) नदीविशेषः। (अस्या उत्पत्तिकथा यथा, ब्रह्मवैवर्त्ते। १०। १२६—१३०।
"गच्छन्तीं तीर्थयात्रायां ब्राह्मणीं रविनन्दनः।
ददर्श कामुकः शान्तः पुष्पोद्याने च निर्ज्जने ॥
तया निवारितो यत्नात् कालेन बलवान् सुरः।
अतीवसुन्दरीं दृष्ट्वा वीर्य्याधानं चकार सः ॥
द्रुतं तत्याज गर्भं सा पुष्पोद्याने मनोहरे।
सद्यो बभूव पुत्त्रश्च तप्तकाञ्चनसन्निभः ॥
सपुत्त्रा स्वामिनो गेहं जगाम व्रीड़िता तदा।
स्वामिनं कथयामास यन्मार्गे दैवसङ्कटम् ॥
विप्रो रोषेण तत्याज तञ्च पुत्त्रं स्वकामिनीम्।
सरिद् बभूव योगेन सा च गोदावरी स्मृता ॥")
तत्पर्य्यायः। गोदा २। इति हेमचन्द्रः ॥ गौतमसम्भवा ३ ब्रात्माद्रिजाता ४ गौतमी ५। ( यथा, हितोपदेशे।
"अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः॥")
इयमेव पीठस्थानविशेषः। अत्र देवी त्रिसन्ध्यामूर्त्त्याविराजते। यथा, देवीभागवते।७।३०।६८।
"गोदावर्य्यां त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥")
अस्या जलस्य गुणाः। पित्तार्शिरक्तार्त्तिवायुपापकुष्ठादिदुष्टामयदोषदृष्णानाशित्वम्। परमपथ्यत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः ॥

गोदुग्धदा, स्त्री, ( गवां दुग्धं ददाति आधिक्येन सम्पादयतीति। गो+दा+कः। तद्भक्षणेन गवां दुग्धवर्द्धनादस्यास्तथात्वम्। ) चणिकाटृणम्। इति राजनिर्घण्टः ॥

गोदोहनी, स्त्री, ( गावो दुह्यन्तेऽस्यामिति। गो+दुह्+अधिकरणे ल्युट्।) गोदोहनपात्रम्। तत्पर्य्यायः। पारी २। इति जटाधरः ॥

गोद्रवः, पुं, ( द्रवति स्रवतीति। द्रु+अच् द्रवः। गवां द्रवः।) गोमूत्रम्। इति राजनिर्घण्टः ॥

गोधनं, क्ली, ( गवां धनं समूहः। ) गोसमूहः। इत्यमरः। २।६।५८॥ (यथा, गोः रामायणे। २। ३२। ३२।
"स आत्मनो दृढ़ां कक्षां बद्धा सम्भ्रान्तमानसः।
दण्डमुद्यम्य सहसा प्रतस्थे गोधनं प्रति ॥")

गोधनः पुं, ( धन शब्दे भावे अप् धनं शब्दः। गौरिवास्येव धनं शब्दो यस्य।) स्थूलाग्रवाणः। इति हरिवंशः ॥ तुक्का इति भाषा ॥

गोधा, स्त्री, ( गुध्यते परिवेष्ट्यते बाहुर्यया। गुध्+"हलश्चेति।" करणे घञ्।) धनुर्गुणाघातवारणाय प्रकोष्ठबद्धा चर्म्मकृतपट्टिका। तत्पर्य्यायः। तला २ ज्याघातवारणा ३। इत्यमरः। २। ८। ८४ ॥ तलम् ४। इति तट्टीका ॥ (यथा, महाभारते। ३। १७। ३।
"विविपन्नादयं चापि धनुः श्रेष्ठं महाबलः।
तूणखड़्गधरः शूरो बद्धगोधाङ्गुलित्रवान् ॥")
जन्तुविशेषः। गोसाप् इति भाषा ॥ सा तु स्थलजजलजभेदात् द्विविधा। तत्पर्य्यायः। निहाका २ गोधिका ३। इत्यमरः। १।१०।२२॥ दारुमुख्याह्वा ४। ( यथा, बृहत्संहितायाम्। ५४। १३।
"श्वेता गोधार्द्धनरे पुरुषे स्यद्भूसरा ततः कृष्णा।
पीता सिता ससिकता ततो जलं विनिर्द्दिशेदमितम् ॥"
पञ्चनखतया गोधाया मांसं भक्ष्यत्वेन ग्राह्यमित्यभिहितं मन्वादिभिर्धर्म्मशास्त्रप्रयोक्तृभिः। यथा, मनुः। ५। १८।
"श्वाविधं शल्लकं गोधां खड़्गकूर्म्मशशांस्तथा।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्राश्चैकतोदतः ॥")
अस्या मांसगुणाः। वातश्वासकासनाशित्वम्। इति राजनिर्घण्टः ॥ पाके मधुरत्वम्। कषायत्वम्। कटुरसत्वम्। पित्तनाशित्वम्। रक्तशुक्रबलकारित्वम्। इति राजवल्लभः ॥
("गोधा विपाके मधुरा कषायकटुका रसे।
वातपित्तप्रशमनी बृंहणी बलवर्द्धनी ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)

गोधापदिका, स्त्री, ( गोधाया इव पादो मूलमस्याः। स्वाङ्गत्वात् ङीष्। ततः "कुम्भपदीषु च।" ५। ४। १३६। इति पद्भावः। गोधापदी। ततः स्वार्थे कन् टाप् पूर्ब्बह्रस्वश्च।) गोधापदीलता। इति शब्दरत्नावली ॥

गोधापदी, स्त्री, (गोधाया इव पादो मूलं यस्याः। स्वाङ्गत्वात् ङीष्। "कुम्भपदीषु च" ५। ४। १३६। इति पद्भावः।) लताविशेषः। गोयालिया इति भाषा ॥ तत्पर्य्यायः। सुवहा २। इत्यमरः। २। ४। ११६ ॥ हंसपदी ३ गोधाङ्घ्री ४ त्रिफला ५। इति भरतः ॥ त्रिपदी ६ मधुस्रवा ७ हंसपादी ८। इति रत्नमाला ॥ हंसपादिका ९ हंसाङ्घ्रिः १० रक्तपादी ११ त्रिपदा १२ घृतमण्डलिका १३ विश्वग्रन्थिः १४ त्रिपादिका १५ त्रिपादी १६ कीटमारी १७ कर्णाटी १८ ताम्रपादी १९ विक्रान्ता २० अश्मादनी २१ पदाङ्गी २२ शीताङ्गी २३ सुतपादिका २४ सञ्चारिणी २५ पदिका २६ प्रक्रादी २७ कीटपादिका २८ धार्त्तराष्ट्रपदी २९ गोधापदिका ३०। इति शब्दरत्नावली ॥ द्विदला ३१ हंसवती ३२। इति जटाधरः ॥ अस्या गुणाः। कटुत्वम्। उष्णत्वम्। विषभूतभ्रान्त्यपस्मारदोषनाशित्वम्। रसायनत्वञ्च। सुषली। तालमूली इति ख्याता। इति राजनिर्घण्टः ॥

गोधास्कन्धः, पुं, ( गोधेव स्कन्धोऽस्य। ) विट्खदिरः। इति राजनिर्घण्टः ॥

गोधिः, पुं, ( गावौ नेत्रे धीयेते अस्मिन्। "कर्म्मण्यधिकरणे च।" ३। ३। ९३। इति किः। ) ललाटम्। इत्यमरः। २। ६। ९२ ॥ (गुध्नाति क्रुध्यतीति। गुध्+"सर्व्वधातुभ्य इन्।" उणां। ४। ११८। इति इन्। ) गोधिका। इति शब्दरत्नावली ॥

गोधिका, स्त्री, (गुध्नातीति। गुध्+ण्वुल्। टापि अत इत्वञ्च। ) गोधा। इत्यमरः। १।१०।२२ ॥ गोसाप इति भाषा ॥

गोधिकात्मजः, पुं, ( गोधिकाया आत्मजः। ) स्थूलगोधिका। गोधाशिशुतुल्याकारकोटरस्थजन्तुविशेषः तोक्के इति ख्यात इति भगी। इति सारसुन्दरी ॥ तत्पर्य्यायः। गौधेरः २। गौधारः ३ गौधेयः ४। इत्यमरः। २। ५। ६ ॥ ( सर्पाद्गोधायामुत्पन्ने जन्तुविशेषे इति गोधिकापुत्त्रशब्दार्थे शब्दार्थचिन्तामणिः ॥)

गोधिनी, स्त्री, ( गोधः क्रीड़ाभेदः सोऽस्त्यस्याः इति इनिः ङीप् च। ) चविका। सा तु बृहतीभेदः। इति राजनिर्घण्टः ॥

गोधुक्, [ह्] त्रि, (गां दोग्धीति। गो+दुह्+"सत्सु द्विषद्रुहदुहयुजइत्यादि।" ३। २। ६१। इति क्विप्।) गोदोग्धा। इति व्याकरणम् ॥ ( यथा, ऋग्वेदे। १। १६४। २६।
"उप ह्वये सुदुघां धेनुमेतां
सुहस्तो गोधुगुत दोहदेनाम् ॥")

गोधुमः, पुं, (गुध+"गुधेरूमः।" उणां। ५। २। इति ऊमः। निपातनात् ह्रस्वः। ) गोधूमः। इति शब्दचन्द्रिका ॥

गोधूमः, पुं, (गुध्यते वेष्ट्यते त्वगादिभिः। गुध+"गुधेरूमः।" उणां। ५। २। इति ऊमः। ) नागरङ्गः। ओषधीविशेषः। व्रीहिभेदः। इति मेदिनी ॥ मे। ४३। गम गोम् इति च भाषा ॥ शेषस्य पर्य्यायः। बहुदुग्धः २ अपूपः ३ म्लेच्छभोजनः ४ यवनः ५ निस्तुषक्षीरः ६ रसालः ७ सुमनाः ८। ( यथा, मनुः। ५। २५।
"यवगोधूमजं सर्व्वं पयसश्चैव विक्रियाः ॥" )
अस्य गुणाः। स्निग्धत्वम्। मधुरत्वम्। वातपित्तदाहनाशित्वम्। गुरुत्वम्। श्लेष्मदबलरुचिवीर्य्यकारित्वञ्च। इति राजनिर्घण्टः ॥ बृंहणत्वम्। जीवनहितत्वम्। शीतत्वम्। भग्नसन्धानस्थैर्य्यकारित्वम्। सारकत्वञ्च। इति राजवल्लभः ॥ ( अथ गोधूमस्य नामानि लक्षणं गुणाश्च।
"गोधूमः सुमनोऽपि स्यात् त्रिविधः स च कीर्त्तितः।
महागोधूम इत्याख्यः पश्चाद्देशात् समागतः ॥
महागोधूमः बड़ गोधूमा इति लोके।
मधुली तु ततः किञ्चिदल्पा सा मध्यदेशजा।
निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः ॥
गोधूमो मधुरः शीतो वातपित्तहरो गुरुः।
कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत् सरः ॥
जीवनो बृंहणो वर्ण्यो व्रण्यो रुच्यः स्थिरत्वकृत्।
कफप्रदो नवीनो न तु पुराणः।
पुराणयवगोधूमः क्षौद्रजाङ्गलशूलभागिति।
वाग्भटेन वसन्ते गृहीतत्वात्।
मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः।
शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुखः स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥